इयम् आकाशवाणी

दिनाङ्क : 04/11/2024 सायम् : 06:20

<u>मुख्यवार्ता:</u>

- उत्तराखण्ड्-राज्ये अलमोडा-जनपदे अद्य जातायां बसयान-दुर्घटनायां न्यूनातिन्यूनं षड् त्रिंशज्जनाः मृताः, पञ्चदश जनाः च व्रणिताः अभवन्। राष्ट्रपति-प्रधानमन्त्रिणौ शोकं प्रकटितवन्तौ।
- झारखण्ड-महाराष्ट्र-राज्ययो: विधानसभा-निर्वाचनाय प्रचाराभियानं द्रुतगत्या विधीयते। भारतीयजनतापार्टीतिदलस्य वरिष्ठनेता प्रधानमन्त्री च नरेन्द्रमोदी झारखण्डस्य गढवा-जनपदे जनसभां समबोधयत्।
- केन्द्रीयमन्त्री प्रह्लादजोशी नव-दिल्ल्यां अंताराष्ट्रिय-सौरगठबन्धनं इत्यस्य सप्तमं सत्रं सम्बोधितवान्, प्रोक्तवान् च यत् भारतेन नवति गीगावॉटपरिमिता-सौरक्षमता अधिगता।
- विदेशमन्त्रिणा डॉ एस् जयशङ्करेण अद्य ब्रिसबेन इत्यत्र भारतस्य नवीनस्य महावाणिज्य-दूतावासस्य उद्घाटनं कृतम्।

- टेबल-टेनिसक्रीडायां , भारतस्य हरमीतदेसाई इत्यनेन वेनेजुएलायाम् आयोजितायां डब्ल्यू-टी-टी फीडर-कैरकस् इति क्रीडायां पुरुषैकलस्पर्धा पुरुषाणां युगलस्पर्धा च विजिता ।

<u>उत्तराखण्ड दुर्घटना</u>

उत्तराखण्ड्-राज्ये, अद्य प्रातः अल्मोडा-जनपदस्य सल्ट्-क्षेत्रे दुःखावहा एका दुर्घटना जाता, यदा कुपी-नगरे एकं बस्-यानम् गभीर-गिरिषु पतितम्, येन षड् त्रिंशज्जनाः मृताः, पञ्चदश जनाः च व्रणिताः अभवन्। एतत् लोकयानं एक पञ्चाशत् यात्रिकैः सह पौडी-जनपदस्य नैनी-डाण्डा-क्षेत्रात् रामनगरं प्रति गच्छत् आसीत् इति कथ्यते। सघन-साहाय्य-उद्धार-कार्याणि च घटनाप्रभावित क्षेत्रे प्रचलन्ति। एस्. डी. आर्. एफ़., एन्. डी. आर्. एफ़., इत्येतेषां बलानां स्थानीयप्राधिकारिणां च दलानि उद्धारकार्याणि सक्रियतया निर्वहन्ति। प्रधानमन्त्री नरेन्द्रमोदी, उत्तराखण्डस्य मुख्यमन्त्री पुष्कर-सिंह धामी च मृतानां जनानां

विषये गभीरं दुःखं प्रकटितवन्तौ। प्रधानमन्त्री, दुर्घटनायां मृतानां प्रत्येकस्य निकटवर्तिनां कृते, प्रधानमन्त्री राष्ट्रिय-साहाय्य कोषात्-द्वि-लक्षरूप्यकाणाम् अनुग्रहराशेः घोषणाम् अकरोत्। व्रणितेभ्यः पञ्चाशत् सहस्र रूप्यकाणि अपि दास्यते। मुख्यमंत्री मृतानां परिवाराणां कृते चत्वारि लक्ष रूप्यकाणां, व्रणितेभ्यः एक-लक्ष-रूप्यकाणां च आर्थिकसाहाय्यं दातुम् आदिशत्। सः कुमाऊं-विभागस्य आयुक्ताय घटनायाः न्यायिकनिरीक्षणं कर्तुं निर्देशं दत्तवान्। श्री धामी पौरी-अल्मोडा इत्येतयोः सम्बद्धक्षेत्रेषु ए. आर्. टि. ओ. इत्यस्य स्थगनस्य निर्देशं दत्तवान्।

<u>झारखण्डनिर्वाचनम्</u>

झारखण्ड-महाराष्ट्र-राज्ययो: विधानसभा-निर्वाचनाय प्रचाराभियानं द्रुतगत्या विधीयते। भारतीयजनतापार्टीतिदलस्य वरिष्ठनेता प्रधानमन्त्री च नरेन्द्रमोदी आक्षिप्तवान् यत् हेमन्तसोरेन नेतृत्वयुतेन प्रशासनेन विगतेषु पञ्चवर्षेषु झारखण्डस्थै: जनैस्साकं वञ्चनं कृतम्। श्रीमोदी गढवास्थलस्य चेतनामैदान-इत्यत्र एकां जनसभां सम्बोधयन् प्रोक्तवान् यत् झारखण्डमुक्तिमोर्चा-काङ्ग्रेस-राष्ट्रिय-जनता-दलै: जनैस्साकं छलं कृतमस्ति। प्रधानमन्त्री झारखण्डराज्ये प्रगतिं द्विगुणीकर्तुं डबलइञ्जन इत्येतस्य प्रशासनं निर्मातुं स्वीयविचारं प्रकटितवान्।

पीएम डेवलपमेंट

श्रीमोदी अग्रे समुदीरितवान् यत् भाजपेतिदलं झारखण्डराज्यस्य सुरक्षा-स्थिरता-समृद्धिनां वचनै: सममेव नैर्वाचनिकरणे अवतरितम्।

चाईबासा-इत्यत्र विजयसङ्कल्पसभाम् सम्बोधयन् श्रीमोदी अवदत् यत् केन्द्र-प्रशासनं सम्पूर्णे राज्ये आदिवासिनां सशक्तीकरणम् अकरोत् परंच हेन्तसोरेन नेतृत्वयुतेन सर्वकारेण तेषाम् अपमानं कृतमिति।
प्रधानमन्त्री अवदत् यत्, झारखण्ड-राज्ये निर्वाचनं तस्मिन् समये क्रियते यदा सम्पूर्णः देशः विकसितभारतस्य संकल्पेन अग्रे गच्छन् अस्ति। प्रधानमन्त्री झारखण्ड-राज्ये झा मु मो नेतृत्वस्य संयुतेः आलोचनां कृत्वा उक्तवान् यत एतद्दलम् अवैध - आव्रजकानां समर्थनम् अकरोत् इति।

<u>प्रह्लादजोशी</u>

नवीन-नवीकरणीयोर्जा मन्त्री प्रह्लादजोशी अद्य अवोचत् यत् भारतेन वर्षं त्रिंशदधिकद्विसहस्रं यावत् पञ्चशतं गीगावॉटपरिमितां नवीकरणीयोर्जा क्षमतां प्राप्तुं नवति गीगावॉटपरिमितां सौरक्षमतां यावत् लक्ष्यं स्थापितम्। श्रीजोशी नवदिल्ल्यां अन्ताराष्ट्रिय-सौर-एकरूपतायाः सप्तमस्य सत्रस्य उद्घाटनसमारोहं सम्बोधयन्नासीत्। असौ कथितवान् यत् प्रशासनेन सप्तत्रिंशत् दशमलव पञ्च गीगावॉटमित-युतानां नवीकरणीयक्षमता युतेभ्यः पञ्चाशत्-सौरोद्यानेभ्यः स्वीकृतिः प्रदत्ता।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

## राष्ट्रपतिः द्रौपदीमुर्मुः

राष्ट्रपतिः द्रौपदीमुर्मुः अद्य राष्ट्रपतिभवने भारतीय-नागर-विमाननक्षेत्रे उपलब्धीप्राप्तानां महिलानां समूहेन सह वार्तालापं कृतवती। एषा सभा 'द प्रेसिडेण्ट् विथ् द पीपल्स्' इति उपक्रमस्य अन्तर्गतम् अभवत् , यस्य उद्देश्यं जनैः सह गहनं सम्बन्धं स्थापयितुं, तेषां योगदानस्य परिचयः च भवेदिति। अस्मिन् अवसरे राष्ट्रपतिः अवदत् यत् भारतस्य नागरिक-विमाननक्षेत्रे विभिन्नेषु परिचालनक्षेत्रेषु तथा च तान्त्रिकक्षेत्रेषु महिलाः महत्त्वपूर्णां भूमिकां निर्वहन्ति इति। राष्ट्रपतिः मुर्मुः न्यगादीत् यत् पञ्चदश प्रतिशतं वायु-यातायातनियन्त्रकाः महिलाः सन्ति, एकादश प्रतिशतं विमानप्रेषकाः महिलाः सन्ति नव प्रतिशतम् आन्तरिक्ष -अभियन्तारः च महिलाः एव सन्ति। राष्ट्रपतिः प्रोक्तवती यत् गतवर्षे वाणिज्य-अनुज्ञापत्रं प्राप्ताः अष्टादश प्रतिशतं विमानचालकाः महिलाः एव आसन् इति। राष्ट्रपतिः प्रावोचत् यत् प्रशासनस्य सर्वसमावेशकप्रयासैः नागरिक-विमाननक्षेत्रे महिलानां प्रगतिः प्रवर्धिता अस्ति।

## जयशङ्करः-महावाणिज्य-दूतावासः

विदेशमन्त्रिणा डॉ एस् जयशङ्करेण अद्य ब्रिसबेन इत्यत्र भारतस्य नवीनस्य महावाणिज्य-दूतावासस्य उद्घाटनं कृतम्। डॉ जयशंकरेण अस्मिन्नवसरे प्रोक्तं यत् अनेन दूतावासेन क्वींसलैंडेन साकं भारतस्य सम्बन्धानां सुदृढीकरणाय, व्यापारवर्धनाय, शैक्षिकसम्पर्क-विस्ताराय, भारतीयमूलस्य जनेभ्यः सौविध्यप्रदानाय च योगदानं प्रदास्यते।

जयशङ्करेण प्रोक्तं यत् अनेन महावाणिज्य-दूतावासेन सह एव आस्ट्रेलियायां निवसद्भिः भारतीयैः सह प्रधानमंत्रिणः नरेन्द्र-मोदिनः कृतवचनस्य पालनम् अभवत्। तेन क्वींसलैंडस्य राज्यपालेन डॉ. जीनेट-यंग इत्यनया सह अपि मेलनं कृतम्। उपवेशनावधौ द्वावेव नेतारौ भारत-क्वीसलैंडयोः मध्ये आर्थिक-व्यापार-निवेशानां सहयोगं सुदृढं कर्तुं विविधान् अवसरान् अधिकृत्य चर्चां कृतवन्तौ।

<u>भारत-कनाडा - रणधीरजयसवाल:</u>

भारतेन ह्यः कनाडायाः ब्रैम्पटन-स्थे  ओंटारियो-नगरे हिंदू-सभा-मंदिरे अतिवादिभिः, पृथक्तावादिभिः च कृतं हिंसाचरणम् अधिकृत्य चिन्ता प्रकटिता अस्ति। विदेश-मन्त्रालयस्य प्रवक्ता रणधीर-जयसवालः प्रोक्तवान् यत् भारतं कनाडा-सर्वकारम् अवोचत् यत् तेन सर्वाण्यपि पूजनस्थलानि एतादृशैः आक्रमणैः रक्षितानि भवेयुः। भारतेन आशा प्रकटिता अस्ति यत् कनाडा-सर्वकारेण  हिंसकप्रकरणे सम्मिलितान् जनान् विरुध्य न्यायाचरणं विधातव्यम्। ओटावा-नगरे भारतीयोच्चायोगेन ओंटारियो-नगरे वाणिज्य-दूतावास-शिबिरात् बहिः हिंसक-व्यवधानम् अधिकृत्य निराशा व्यक्तीकृता।  आयोगेन कथितम् यत् ब्रैम्पटन इत्यत्र हिंदू-सभा-मंदिरेण सह, वाणिज्य-दूतावास-शिबिरात् बहिः भारतरोधि-तत्वैः हिंसक-व्यवधानं विहितम्।

<u>टेबलटेनिस् – डब्ल्यू-टी-टी फीडर-कैरकस्</u>

टेबल-टेनिसक्रीडायां, भारतस्य हरमीतदेसाई इत्यनेन वेनेजुएलायाम् आयोजितायां डब्ल्यू-टी-टी फीडर-कैरकस् इति क्रीडायां पुरुषैकलस्पर्धा पुरुषाणां युगलस्पर्धा च विजिता। पुरुषैकलस्पर्धायां हरमीतेन फ्रांसदलस्य जो-सेफ्राईड इत्येषः शून्यं विरुध्य त्रिभिः क्रीडनाङ्कैः पराजितः।

।।इति वार्ता:।।